अण्डयोरथ पादेषु पार्श्वयोरुभयोरपि ॥
एतद्वलं सुविज्ञेयं वाजिनां भिषगुत्तमैः ।
अन्ये सप्तदशान्याहुः सिराद्वाराणि वाजिनः ॥
येषु रक्तं हृतं सद्यः प्रकरोति ततः सुखम् ।
गुल्फे गले तथा मेढ्रे कक्षान्ते चैव पत्रके ।
गुदे पुच्छेऽथ वस्तौ च जङ्घयोः सर्व्वसन्धिषु ।
जिह्वायां चाधरे चौष्ठे नेत्रयोरुभयोरपि ॥
कर्णमूले मणौ गण्डे रुधिरं स्रावयेद्भिषक् ।
कौस्तुभमानफलेन त्याज्यं रक्तं तुरङ्गप्रमाणम् ॥”
तद्यथा,—
“मलं शतं मुखे त्याज्यं कक्षयोश्चैकमेव च ।
शतार्द्धं नेत्रदेशाच्च मेढ्रदेशात्तथैव च ॥
गण्डयोरण्डयोश्चैव स्रावयेत् पञ्चविंशतिम् ।
द्वादशैव गुदे प्राहुरश्वशास्त्रविचक्षणाः ॥
पैत्तिकं कालिकं विद्याद्वाते विद्यात् सफेनिलम् ।
पिच्छिलं श्लेष्मलं पाण्डु कषायोदकवच्च यत् ॥”*

अथ ऋतुचर्य्या ।

“न प्राज्ञो वाहयेदश्वान् प्रावृट्काले कथञ्चन ।
यदीच्छेदन्यतन्तस्य वाहनं दशमासिकम् ॥
कूपोदकं कटुकतैलनिवातगेहं
शस्तं पलार्द्धलवणं दिवसान्तरेण ।
तत्रान्यथा सति सुखामयवीर्य्यहानि-
र्मुख्यैर्गलैर्विरहितस्तु वयो विनश्येत् ॥
शरदि गुडघृतं पयः प्रशस्तं
शरदि सिताष्टपलप्रमाणमच्छम् ।
मधुरमथ जलं सरोवरोत्थं
घृतयुतनीलसकुष्टकाश्च भोज्याः ॥
हेमन्तकाले घृततैलमाषा
निर्व्वातसंस्था च पयो यथेच्छम् ।
शनैः शनैर्वाहनकर्म्म कुर्य्याद्-
यवांश्च पक्वा वितरेद् विधिज्ञः ॥
शिशिरे तैलपलाष्टकं कटिस्थं
दिनसप्तावधि पाययेत्तुरङ्गान् ।
तदनु प्रातर्भोजयेद्यवांश्च
यवयवमाषं तथाम्बृतस्वरूपाः ॥
यस्य दत्ता यवा भोज्ये शिशिरे समुपस्थिते ।
घृतत्वापि क्रियाः सर्व्वाः स हयः सुखमृच्छति ॥
वसन्ते संप्राप्ते निजसुखवशाद्वाहय हयान्
घृतं तैलं शस्तं सकलविधिरुक्तोऽपि च मतः ।
पयो दद्यादस्मै सलवणमथो वाहनविधि-
र्भृशं योऽप्यस्तेनाब्दमपि सुखमिच्छेद्धयवरः ॥
वसन्तसमये योऽश्वः स्थाने तिष्ठति बन्धने ।
तस्योत्साहः प्रणश्येत सालस्यं जायते वपुः ॥
ग्रीष्मे घृतं चतजमोक्षणघर्म्मशान्ति-
सुच्छायबन्धनविमर्द्दनशीततोयम् ।
दूर्व्वा तृणं लघु च कोमलमन्यदेव
यत्किञ्चिदेवसुपयुक्तमिदं वदन्ति ॥”* ॥
भोजे तु हयलक्षणमन्यथा,—
स्निग्धाङ्गो लघुतरलोमकस्तु पुच्छो
दीर्घास्यास्थिनयनकेशपृष्ठवंशः ।
रक्तोष्ठः पृथुजनितम्बभारवक्षा
राजार्हो भवति तुरङ्गमः प्रशस्तः ॥

नाभेरारभ्य देहस्तु द्विधा पूर्व्वापरक्रमात् ।
पूर्व्वकायस्थिता रक्ताः शुभाय हयसंस्थिताः ॥
अधःकाये स्थिता रक्ता अधमत्वप्रकाशकाः ।
शुक्तीनां वैपरीत्येन प्रशस्तफलमादिशेत् ॥”* ॥
वात्स्यस्तु ।
“ब्रह्मादिजातिभेदेन हयजातिश्चतुर्व्विधा ।”
तद्यथा,—
“ये शुक्लाः सुविमलपुष्पगन्धा ये वा
शुद्धाङ्गाः सतृणसदुग्धभोजिनो वा ।
अक्रुद्धाः समरगता भृशञ्च पुष्टा-
स्ते विप्राः क्षितिपतिवाहनेऽतियोग्याः ॥
ये रक्ताः सदगुरुगन्धयोऽहता वा
संरुष्टाः बहुतरभोजिनो बलाढ्याः ।
अश्रान्ताः सकलगुणग्रहाः प्रवीणा
विज्ञेया विधिकरजातजातयस्ते ॥
ये पीताः खलु घृतगन्धयोऽपि ये वा
येऽक्रुद्धाः कथमपि रोषशालिनो ये ।
बद्धा वा बहुतरनादघोषणा वा
विज्ञेया नृपवर ! वैश्यजातयस्ते ॥
ये कृष्णाः सरुधामगन्धयोऽपि ये वा
अन्यथा बहुतरताडनैरपीमे ।
क्षीणाङ्गा लघुतनवोऽपि वेशहीना-
स्ते शूद्राः क्षितिपतिना भृशं विहेयाः ॥”
एतत्तु एकैकमेव लक्षणं न सामुदायिकम् ॥
“लक्षणद्वयसम्बन्धात् द्विजातिः स्यात्तुरङ्गमः ।
चतुर्लक्षणयुक्तस्तु दूरे त्याज्यो हयाधमः ॥”* ॥
अन्यत्र तु ।
“सात्त्विका राजसाश्चेति तामसाश्चेति ते
हयाः ॥
ये शुद्धवर्णा भृशवेगयुक्ता
अश्रान्तिभाजो बहुभोगिनश्च ।
अक्रोधशीलाः संमरेऽतिरुष्टा-
स्ते सात्त्विका भूप ! तुरङ्गमाः स्युः ॥
ये रक्तवर्णा गुरुवेगरोषाः
कषाभिघातं न हि ये सहन्ते ।
येऽश्मी बलाढ्याः खलु दीर्घदेहा-
स्ते राजसा भूप ! तुरङ्गमाः स्युः ॥
ये कृष्णवर्णास्तनुरोषवेगा
अल्पाशिनो लक्षणलक्षिताश्च ।
ये दुर्व्वलाः सर्व्वगुणैर्विहीना-
स्ते तामसा भूप ! तुरङ्गमाधमाः ॥
द्वयोर्लक्षणसम्बन्धात् द्विगुणो वाजिमध्यमः ।
त्रयाणां गुणसम्बन्धात् त्रिगुणो वाजिनिन्दितः ॥”
पराशरसंहितायान्तु ।
“पृथिव्यब्वायुतेजःखैः पञ्चभिस्तुरगाश्रितैः ।
उल्वणैः पञ्चधा भेदाः परशरमता यथा ॥
ये स्थूलाः श्रमसहदेहरूपभाज-
श्चाक्रान्ता बहुतरभोजनाश्च दीर्घाः ।
अक्रुद्धाः समरगतास्तु रोषभाजो
भौमास्ते घनगुरुघर्घरस्वरास्तु ॥
ये श्यामाङ्गास्तनुबलाः श्रमासहकलेवराः ।
अक्रोधवेगाः सस्वप्ना आप्यास्ते तुरगाधमाः ॥

ये वातवेगप्रतिमोग्रवेगाः
शुष्का भृशं दीर्घकलेवराश्च ।
अश्रान्तिभाजो बहुदूरगाश्च
ते वायवा वाजिवराः प्रदिष्टाः ॥
ये क्रोधशीला भृशवेगयुक्ता
मुक्ता दिनात् क्रोशशतं व्रजन्ति ।
ते तैजसाः पुण्यवतां प्रदेशे
भवन्ति पुण्यैरपि ते मिलन्ति ॥
एको यदा तैजससंज्ञकोऽश्वः
किं कार्य्यमन्यैस्तुरगाधमैस्तु ।
शुद्धं यदा हीरकखण्डमेकं
किं कार्य्यमन्यैर्मणिभिर्विचित्रैः ॥
उत्प्लुत्य ये वाजिवरा व्रजन्ति
क्षुधा भृशं वेगसमन्विताश्च ।
ये लङ्घयन्तः परिखामपारां
ते गागना पुण्यतमाः प्रदिष्टाः ॥
द्वयोर्लक्षणसम्बन्धात्तुरगः स्यात् द्विभौतिकः ।
स्वजातिगुणभूतानां हयानां वाहनं शुभम् ॥
शालिहोत्रादिविज्ञानात्तद्विज्ञेयं यथोत्तरम् ।
असम्भवे हि दुष्टाश्वं वाहयेदिति चेत्तदा ॥
तिलं सकाञ्चनं दद्यात्लवणं वा गुडान्वितम् ।
रेवन्तं पूजयेद्वापि निजं निर्मन्थयेत्तदा ॥
दद्यात्ताम्रपलं वापि अभावे सर्व्वकर्म्मणः ॥”
एवमन्यत्रापि ।
“काञ्चनं रजतं ताम्रं लौहमेतद्यथाक्रमम् ।
ब्रह्मादिजातिदोषाणां देयमेतत् प्रशान्तये ॥
अभावेऽपि च सर्व्वेषां ताम्रेण स्यात् प्रति-
क्रिया ।”
इति हयपरीक्षा ॥ * ॥
इति भोजराजकृतयुक्तिकल्पतरुः ॥
(“येन ज्ञानवता हिमालयतरुच्छायासु
विक्रीडितम्
यः स्नातो हिमपुष्पवातशिशिरे गङ्गाजले पावने ।
रेमे यस्तु तुरङ्गयूथजनितैर्नानाविधैर्हेषितैः
पायाद्वः स तुरङ्गघोषतनयः श्रीशालिहोत्रो
मुनिः ॥
जयति च पाण्डवनाथो धर्म्मसनाथो युधिष्ठिरो
नृपतिः ।
भीमार्ज्जुनसहदेवास्तदनु च ये वाजिशास्त्रतत्त्वज्ञाः ॥
दृष्ट्वा सम्यङ्नकुलः शास्त्रं कृतस्नं च शालि-
होत्रीयम् ।
ब्रूते शास्त्रार्थमन्यच्छास्त्रं कृत्वा समासेन ॥
प्रश्नो जातिवर्णमावर्त्तदन्ता
लक्ष्यं वेगा वाहनं धातुरसम् ।
कालो नस्यं पिण्डमाज्यं कषायं
शाला चेष्टा वाजिनामत्र वक्ष्ये ॥
सपक्षा वाजिनः सर्व्वे सञ्जाता व्योमचारिणः ।
गन्धर्व्वेभ्यो यथाकामं गच्छन्ति च समन्ततः ॥
तान् दृष्ट्वा जवसम्पन्नानसह्यान्वाहनोचितान् ।
शक्रः प्रोवाच पार्श्वस्थं शालिहोत्रं मुनीश्वरम् ॥
नास्त्यसाध्यं मुने ! किञ्चिद्भवतो भुवनत्रये ।
तस्मादाशु कुरुष्व त्वं वाहनार्हान् हयोत्तमान् ॥